# सुन्दरकाण्ड एकोनचत्वारिंशः सर्गः (३९) - सीता समाश्वासनम्

मणिं दत्त्वा ततः सीता हनुमन्त मथाब्रवीत् ।
अभिज्ञान मभिज्ञात मेतद्रामस्य तत्त्वतः ॥ १ ॥

मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ।
वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥

स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ।
अस्मिन् कार्य समारम्भे प्रचिन्तय यदुत्तरम् ॥ ३ ॥

त्वमस्मिन् कार्य निर्योगे प्रमाणं हरिसत्तम ।
हनुमन् यत्न मास्थाय दुःख क्षयकरो भव ॥ ४ ॥

तस्य चिन्तयतो यत्नो दुःख क्षयकरो भवेत् ।
स तथेति प्रतिज्ञाय मारुतिर् भीम विक्रमः ॥ ५ ॥

शिरसाऽऽवन्द्य वैदेहीं गमनायोप चक्रमे ।
ज्ञात्वा सम्प्रस्थितं देवी वानरं मारुतात्मजम् ॥ ६ ॥

बाष्प गद्गदया वाचा मैथिली वाक्य मब्रवीत् ।
कुशलं हनुमन्ब्रूयाः सहितौ राम लक्ष्मणौ ॥ ७ ॥

सुग्रीवं च सहामात्यं वृद्धान्सर्वांश्च वानरान् ।
ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्म संहितम् ॥ ८ ॥

यथा स च महाबाहुर् मां तारयति राघवः ।
अस्माद् दुःखाम्बु संरोधात् तवं समाधातु मर्हसि ॥ ९ ॥

जीवन्तीं मां यथा रामः सम्भावयति कीर्तिमान् ।
तत्तथा हनुमन् वाच्यो वाचा धर्म मवाप्नुहि ॥ १० ॥

नित्यमुत्साह युक्ताश्च वाचः श्रुत्वा त्वयेरिताः ।
वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥

मत् सन्देश युता वाचस् त्वत्तः श्रुत्वैव राघवः ।
पराक्रम विधिं वीरो विधिवत् संविधास्यति ॥ १२ ॥

सीताया वचनं श्रुत्वा हनुमान् मारुतात्मजः ।
शिरस्यञ्जलि माधाय वाक्य मुत्तर मब्रवीत् ॥ १३ ॥

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्ष प्रवरै र्वृतः ।
यस्ते युधि विजित्यारीन् शोकं व्यपनयिष्यति ॥ १४ ॥

न हि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा ।
यस्तस्य क्षिपतो बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥

अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ।
स हि सोढुं रणे शक्तस्तव हेतोर् विशेषतः ॥ १६ ॥

स हि सागर पर्यन्तां महीं शासितु मीहते ।
त्वन् निमित्तो हि रामस्य जयो जनक नन्दिनि ॥ १७ ॥

तस्य तद् वचनं श्रुत्वा सम्यक् सत्यं सुभाषितम् ।
जानकी बहु मेनेऽथ वचनं चेद मब्रवीत् ॥ १८ ॥

ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ।
भर्तृ स्नेहान्वितं वाक्यं सौहार्दा दनुमानयत् ॥ १९ ॥

यदि वा मन्यसे वीर वसैकाहमरिन्दम ।
कस्मिंश्चित् संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥

मम चेदल्प भाग्यायाः सान्निध्यात् तव वानर ।
अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥

गते हि हरि शार्दूल पुनरागमनाय तु ।
प्राणानामपि सन्देहो मम स्यान्नात्र संशयः ॥ २२ ॥

तवादर्शनजः शोको भूयो मां परितापयेत् ।
दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥

अयं च वीर सन्देहस् तिष्ठतीव ममाग्रतः ।
सुमहांस् त्वत् सहायेषु हर्यृक्षेषु हरीश्वर ॥ २४ ॥

कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ।
तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २५ ॥

त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ।
शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २६ ॥

तदस्मिन्कार्यनिर्योगे वीरैवं दुरितक्रमे ।
किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥ २७ ॥

काममस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः पर वीरघ्न यशस्यस्ते फलोदयः ॥ २८ ॥

बलैः समग्रैर् यदि मां रावणं जित्य सम्युगे ।
विजयी स्वपुरीं यायात् तत्तु मे स्याद् यशस्करम् ॥ २९ ॥

शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ।
मां नयेद्यदि काकुत्स्थस् तत्तस्य सदृशं भवेत् ॥ ३० ॥

तद्यथा तस्य विक्रान्त मनुरूपं महात्मनः ।
भवेदाहव शूरस्य तथा त्वमुप पादय ॥ ३१ ॥

तदर्थोप हितं वाक्यं सहितं हेतु संहितम् ।
निशम्य हनुमान् शेषं वाक्य मुत्तर मब्रवीत् ॥ ३२ ॥

देवि हर्यृक्ष सैन्याना मीश्वरः प्लवतां वरः ।
सुग्रीवः सत्त्व सम्पन्नस् तवार्थे कृत निश्चयः ॥ ३३ ॥

स वानरसहस्राणां कोटीभि रभिसंवृतः ।
क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥

तस्य विक्रम सम्पन्नाः सत्त्व वन्तो महाबलाः ।
मनः सङ्कल्प सम्पाता निदेशे हरयः स्थिताः ॥ ३५ ॥

येषां नोपरि नाधस्तान्न तिर्यक् सज्जते गतिः ।
न च कर्मसु सीदन्ति महत् स्वमित तेजसः ॥ ३६ ॥

असकृत्तैर् महोत् साहैः ससागर धरा धरा ।
प्रदक्षिणी कृता भूमिर् वायु मार्गानु सारिभिः ॥ ३७ ॥

मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन् नास्ति सुग्रीव सन्निधौ ॥ ३८ ॥

अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३९ ॥

तदलं परितापेन देवि शोको व्यपैतु ते ।
एकोत् पातेन ते लङ्का मेष्यन्ति हरि यूथपाः ॥ ४० ॥

मम पृष्ठगतौ तौ च चन्द्रसूर्या विवोदितौ ।
त्वत्सकाशं महासत्त्वौ नृसिंहावा गमिष्यतः ॥ ४१ ॥

तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ।
आगम्य नगरीं लङ्कां सायकैर् विधमिष्यतः ॥ ४२ ॥

सगणं रावणं हत्वा राघवो रघुनन्दनः ।
त्वामादाय वरारोहे स्वपुरं प्रतियास्यति ॥ ४३ ॥

तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ।
न चिराद् द्रक्ष्यसे रामं प्रज्वलन्त मिवानलम् ॥ ४४ ॥

निहते राक्षसेन्द्रेऽस्मिन् सपुत्रामात्य बान्धवे ।
त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४५ ॥

क्षिप्रं त्वं देवि शोकस्य पारं यास्यसि मैथिलि ।
रावणं चैव रामेण निहतं द्रक्ष्यसेऽचिरात् ॥ ४६ ॥

एव माश्वास्य वैदेहीं हनुमान् मारुतात्मजः ।
गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत् ॥ ४७ ॥

तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ।
लक्ष्मणं च धनुष्पाणिं लङ्काद्वार मुपस्थितम् ॥ ४८ ॥

नख दंष्ट्रायुधान् वीरान् सिंह शार्दूल विक्रमान् ।
वानरान् वारणेन्द्राभान् क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४९ ॥

शैलाम्बुद निकाशानां लङ्का मलय सानुषु ।
नर्दतां कपि मुख्याना मार्ये यूथान् यनेकशः ॥ ५० ॥

स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ।
न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥

मा रुदो देवि शोकेन मा भूत्ते मनसोऽप्रियम् ।
शचीव पत्या शक्रेण भर्त्रा नाथवती ह्यसि ॥ ५२ ॥

रामाद्विशिष्टः कोऽन्योऽस्ति कश्चित् सौमित्रिणा समः ।
अग्निमारुत कल्पौ तौ भ्रातरौ तव संश्रयौ ॥ ५३ ॥

नास्मिंश् चिरं वत्स्यसि देवि देशे
रक्षोगणै रध्युषितेऽति रौद्रे ।
न ते चिरा दागमनं प्रियस्य
क्षमस्व मत्सङ्ग मकाल मात्रम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे
एकोनचत्वारिंशः सर्गः ॥ ३९ ॥